नन्दिकः ११ नन्दिवृक्षकः १२। इति शब्दरत्नावली ॥ * ॥ मेषशृङ्गीवृक्षः। इति रत्नमाला ॥ स्थालीवृक्षः। इति भावप्रकाशः ॥

नन्दीशः, पुं, (नन्दी ईशस्य।) नन्दी। इति हेमचन्द्रः ।२।१२४। भरतोक्ततालप्रभेदः। यथा,—
"सिंहनन्दननन्दीशचन्द्रबिम्बद्वितीयकाः ॥"
तस्य लक्षणं यथा,—
"गो लघुर्गौ लघुः प्रुतस्तावे नन्दीश्वरे मताः।"
इति सङ्गीतदामोदरः ॥
(नन्दिनो नन्दिगणस्य ईशः। इति विग्रहे शिवः ॥)

नन्दीश्वरः, पुं, (नन्दिनो गणविशेषस्य ईश्वरः।) शिवः। इति शब्दरत्नावली ॥ नन्दीशतालः। इति सङ्गीतदामोदरः ॥ (नन्दी ईश्वरश्च।) शिवद्वारपालः। तस्य शिवपार्श्वदत्वकारणं यथा,—
"ततस्त्रेतायुगे काले नन्दी नाम महामुनिः।
आरिराधयिषुः शर्व्वं तपस्तेपे सुदारुणम् ॥
ततस्तु भगवान् प्रीतस्तस्मै विप्राय शङ्करः।
उवाच च वचः साक्षात्तम्र्षिं वरदः प्रभुः ॥
वराद् वृणीष्व विप्रेन्द्र! यानिच्छसि महामुने!॥
तांस्ते सर्व्वान् प्रयच्छामि दुर्लभानपि मारिष ॥
इत्युक्तोऽसौ भगवता शर्व्वेण मुनिपुङ्गव।
प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना ॥
यदि प्रीतोऽसि भगवन्! अनुक्रोशतया मम।
अनुग्राह्यो ह्यहं देव त्वयावश्यं सुराधिप!॥
यथा नान्यं भवेद्भक्तिस्त्वयि नित्यं महेश्वर!।
तथाहं भक्तिमिच्छामि सर्व्वभूताशये त्वयि ॥
एतत्तु वचनं श्रुत्वा नन्दिनः स महेश्वरः।
प्रहस्योवाच तं प्रीत्या ततो मधुरया गिरा ॥
मद्रूपधारी मत्तेजाश्चापि सर्व्वगुणोत्तमः।
भविष्यसि न सन्देहो देवदानवपूजितः ॥
अनेनैव शरीरेण जरामरणवर्ज्जितः।
दुष्प्राप्येयमवाप्या ते देवैर्गाणेश्वरी गतिः ॥
पार्श्वदानां वरिष्ठश्च मामकानां द्विजोत्तम!।
नन्दीश्वर इति ख्यातो भविष्यसि न संशयः ॥
अद्यप्रभृति देवाश्च! देवकार्य्येषु सर्व्वतः।
त्वं प्रभुर्भविता लोके मत्प्रसादान्मुनीश्वर!॥
त्वामेवाभ्यर्च्चयिष्यन्ति सर्व्वभूतानि सर्व्वतः।
मत्तः समभिवाञ्छन्तः प्रसादं पार्श्वदाधिप!॥
यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु।
नावयोरन्तरं किञ्चिदम्बरानिलयोरिव ॥
द्वारे तु दक्षिणे नित्यं त्वया स्थेयं गणाधिप!।
वामेन विभुना वापि महाकालेन सर्व्वदा ॥"
इति वराहपुराणम् ॥

नन्दीसरः, [स्] स्त्री, (नन्द+इन्+दा ङीष्। नन्द्यै आनन्दार्थं यत् सरः।) इन्द्रसरोवरः। इति शब्दमाला ॥

नन्द्यावर्त्तः, पुं, (नन्दिजनक आवर्त्तो यत्र।) ईश्वरसद्मविशेषः। इत्यमरः ।२।२।१०। तस्य लक्षणं यथा,—
"दक्षिणानुगतालिन्दत्रयं यत् पश्चिमामुखम्।
पूजनीयोत्तरच्छायं नन्द्यावर्त्तं वदन्ति तत् ॥"
इति भरतधृतसाङ्गः ॥
तगरद्रुमः। इति विश्वः ॥ मत्स्यभेदः। तस्य गुणः। संग्राहित्वम्। कफपित्तविनाशित्वञ्च। इति राजवल्लभः ॥

नपुंसकं, क्ली, (न स्त्री न पुमान्। "नभ्राण्नपान्नवेदा-दिति।" ६। ३। ७५। इति निपातनात् स्त्रीपुंसयोः पुंसक-आदेशः।) क्लीवम्। इत्यमरः। २। ६। ३९ ॥ हिजिड़ा इति भाषा ॥ तस्य कारणं यथा,—
"उभयोर्व्वीजसामान्ये जायते वै नपुंसकम् ॥"
इति सुखबोधः ॥ * ॥
(नपुंसको भवेदिति भाष्यप्रयोगात् पुलिङ्गोऽपि भवति। तथा, च पञ्चतन्त्रे। १। ३६४।
"परदेशभयाद्भीता बहुमाया नपुंसकाः।
स्वदेशे निधनं यान्ति काकाः कापुरुषा मृगाः ॥")
नपुंसकगर्भस्य चिह्नं यथा,—
"नपुंसकं यदा गर्भो भवेद्गर्भोऽर्व्वुदाकृतिः।
उन्नते भवतः पार्श्वे पुरस्तदुदरं महत् ॥" * ॥
नपुंसकविशेषानाह।
"आसेक्यश्च सुगन्धिश्च कुम्भीकश्चेर्ष्यकस्तथा।
अमी सशुक्रा बोद्धव्या अशुक्रो भूषसंज्ञकः ॥"
तेषां लक्षणान्याह।
"पित्रोस्तु स्वल्पवीर्य्यत्वादासेक्यः पुरुषो भवेत्।
स शुक्रं प्राश्य लभते ध्वजोन्नतिमसंशयम् ॥
यः पूतियोनौ जायेत स हि सौगन्धिको भवेत्।
स्वे गुदेऽब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते।
स कुम्भीक इति ज्ञेयो गुदयोनिस्तु स स्मृतः ॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते।
ईर्ष्यकः स तु विज्ञेयो दृष्टियोनिश्च स स्मृतः ॥
यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते।
तत्र स्त्रीचेष्टिताकारो जायते षण्ढसंज्ञकः ॥"
इति भावप्रकाशः ॥
(अस्य विवृतिर्यथा,—
"समवीर्य्यरजस्त्वेन नरः स्त्रीप्रकृतिर्भवेत्।
नपुंसकमिति ख्यातं न स्त्री न पुरुषो वदेत् ॥"
"समदोषबलेनापि प्रकृत्या विकृतेरपि।
समो भवेदृक्क् शुक्रो नपुंसकसमुद्भवः ॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥)

नप्ता, [ऋ] पुं, (न पतन्ति पितरो येनेति। पत+"नप्तृनेष्टृत्वष्टृेति।" उणां २। ९६। इति तृन्प्रत्ययेन निपातनात् साधुः।) पुत्रकन्ययोः पुत्रः। नाति इति भाषा। तत्पर्य्यायः। पौत्रः २ सुतस्य सुतः ३। इति हेमचन्द्रः ॥ (यथा, महाभारते। १। ८५। २०।
"कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो!।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यति ॥")

नप्त्री, स्त्री, (नप्तृ+"ऋन्नेभ्यो ङीप्।" ४। १। ५। इति ङीप्।) पुत्रकन्ययोः पुत्री। नातिनी इति भाषा। तत्पर्य्यायः। पौत्री २ सुतात्मजा ३। इत्यमरः। २। ६। २९ ॥ नप्ता ४ पौत्रिका ५। इति रभसः ॥ सुतस्य सुतायाश्चात्मजायां नप्त्री पुत्रस्य पुत्र्याश्चापत्यं पौत्री अतएव पौत्रोऽपि नप्ता। इत्यमरटीकायां भरतः ॥

नभः, पुं, (नभति हिनस्ति कीटादीनिति। नभ हिंसायाम्+पचाद्यच्।) श्रावणमासः। इति शब्दरत्नावली ॥ (द्वितीयमनोः स्वारोचिषस्य पुत्रविशेषः। इति हरिवंशे। ७। १४ ॥ तृतीयमन्वन्तरदेवविशेषः। इति च तत्रैव। ७। १९ ॥ कुशप्रपौत्रनलस्य पुत्रः। इति च हरिवंशे। १५। २७ ॥)

नभः, [स्] क्ली, (नह्यते मेघैरिति। नह बन्धने+"नहेर्दिवि भश्च।" उणां ४। २१०। इति असुन् भश्चान्तादेशः।) आकाशम्। इत्यमरः। १। २। १ ॥ (यथा, मनुः। ४। ३७।
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥")

नभःक्रान्ती, [न्] पुं, (नभःक्रान्तं गगनाक्रमणमस्यस्येति। इनिः।) सिंहः। इति शब्दमाला ॥

नभःप्राणः, पुं, (नभसः प्राण इव।) पवनः। इति त्रिकाण्डशेषः ॥

नभःसत्, [द्] पुं, (नभसि सीदतीति। सद्+क्विप्।) देवः। इति त्रिकाण्डशेषः ॥

नभःसरित्, स्त्री, (नभसः सरित् नदी।) स्वर्गङ्गा। इति त्रिकाण्डशेषः ॥

नभःस्थितः, पुं, (नभसि स्थितः।) नरकविशेषः। इति हेमचन्द्रः। ५।२ ॥ आकाशस्थिते, त्रि ॥

नभश्चक्षुः, पुं, (नभसश्चक्षुरिव।) सूर्य्यः। इति शब्दमाला ॥

नभश्चमसः, पुं, (नभसश्चमस इव।) चन्द्रः। चित्रापूपः। इन्द्रजालम्। इति मेदिनी। से, ३८।

नभश्चरः, पुं, (नभसि चरतीति। चर+टः।) पक्षी। विद्याधरः। (गन्धर्व्वादिः। यथा, रघुः। १८। ६।
"नभश्चरैर्गीतयशाः स लेभे
नभस्तलश्यामतनुं तनूजम् ॥")
मेघः। वायुः। इति मेदिनी। रे, २०२ ॥
(आकाशचारिणि, त्रि। यथा, कुमारे। ५। २३।
"निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन सा ॥")

नभसं, क्ली, (नभति व्याप्नोतीति। नभ+"अतविचमितमीति।" उणां। ३। ११७। इति असच्।) आकाशम्। यथा। नभसं खं मेघवर्त्म विहायसमिति निगमः ॥ (पुं, दशममन्वन्तरीयसप्तर्षीणामन्यतमः। यथा, हरिवंशे। ७। ६७।
"अङ्गिरा नभसः सत्यं सप्तैव परमर्षयः ॥")

नभसङ्गमः, पुं, (नभसं गच्छतीति। गम+गमेः सुपीति खच्। ततो मुम्।) पक्षी। इत्यमरः। २। ४। ३४ ॥